जामि वा इत्यादेरजामित्वायेत्यंतस्य सर्वस्य महावाक्यस्यैकत्वप्रतीतेः न चैकस्मिन्वाक्ये विधेयबाहुल्यं संभवति न चात्र विधित्सित
स्योपांशुयाजस्य द्रव्याभावः ध्रौवस्य तद्रूपत्वात् नापि देवताया अभावः नाना शाखासूपांशुयाजक्रमे पठिते वैष्णवप्राजापत्याग्नीषो
मीयमंत्रैः विकल्पेन देवतात्रयस्य प्रतीयमानत्वात् तस्माद्यजतीत्यत्र द्विधा पदे पंचमो ऽधि० अग्निहोत्राघारवाक्यमनुवादोऽथवा
विधिः अरूपत्वान्नु दध्न इन्द्रवाक्ये नाक्रमनूद्यते गुणएष सिद्धो न दध्यादिर्गुणो दृष्टा विशिष्टता रूपं दध्यादि मंत्राभ्यामत्तोऽसौ गुणेन वि
धिः इदमाम्नायते अग्निहोत्रं जुहोति दध्ना जुहोति पयसा जुहोतीति तत्र इदमपरमाम्नायते आघारमाघारयति ऊर्ध्वमाघारयति

घा

द्वि

वर्लिकी ॥ आघारस्य वंद्रव्यदेवते उन्नेतव्ये । षष्ठाधिः ॥ यजत्यालभतीएतावनुवादौ विधीउताग्रहात्व [redacted] ५

न्या॰ मा॰ ३८ अनुमापारयतीति चतत्राग्निहोत्रवाक्यं दध्यादिवाक्यविहितस्य कर्मसमुदायस्यानुवादः आघारवाक्यं चोद्धृदिवाक्यविहितस्यानुले

तेह्यावाक्यं कर्मविधायकं कुतः द्रव्यदेवतालसणस्य यागरूपस्याभावादिति चेन्नत्रवक्तव्यं किं दध्यादिवाक्ये नगुणमात्रं विधीयते किंवा

गुणविशिष्टं कर्म नाद्यः अग्निहोत्रादिवाक्यस्योत्पन्नेन कर्मविधायकत्वाभावेन गुणिनः कस्यचिदसिद्धेर्गुणपनुवादस्तुरः सा स्यगुणा

38 मात्रविधानस्यासंभवात् द्वितीये विधिगौरवं स्यात् नतु सत्यागनावपूर्वकेष्वग्निहोत्रादिवाक्यं कर्मविधायकं तत्र दध्यादिपदे

लं भ्यते देवतातु मात्रैवं षतीस्मा म्याविहितेर्थेनुवादिनो नानुवादो। पुरोवादस्य पशुमालभ्यो रतो विधिः ग्रहणं सोमसंस्कारो वदानयमु

संस्क्रिया सोमेन यजेतेति अरूपेन तत्रैन्द्रवायवं गृह्णातीति मैत्रावरुणं गृह्णातीत्यादीनि श्रुतानि शंवमग्नीषोमीयं पशुमाल

भेतेति अपेतन वरुदयस्यास्मेनवयति अथ जिह्वाया अथवक्षसः इत्यादीन्यपि श्रुतानि तत्रैन्द्रवायवादिवाक्यैर्यागा विधीयन्ते ऐन्द्र

वायवादिशाति पदिके देवतानां तद्धितेन सोमरसद्रव्यस्य च प्रतीयमानत्वात् एतेषां ग्रहणवाक्यविहितानां यागानां समुदायः यः पशुमा

लभेत समनेनानूद्यते इति माप्रभ्रमः सति हि परोवादे अनुवादो भवति नचात्र परोवादोस्ति सोमेन यजेते स्यनेन प्रतीतस्यार्थस्य ग्रहणवा

क्यैष्प्रतीतेः नहि ग्रहणं यजनं भवति नापि तद्धितप्रत्ययाकारसः सोमलतानवतद्धितप्रत्ययः सर्वनामार्थे विहितः प्रकृतं तत्र तेन

गुरसमिति शकनीयं धारयागृह्णातीतिरसस्यैव प्रकृतत्वात् तथापशुमालभेतेत्यनेन प्रतीतोर्थो नावदानवाक्येष्प्रतीयते ततः राम

पुरोवादाभावेऽनुवादासंभवात् यजेतसालभतिभ्यां कर्मणी विधीयेते ग्रहणवाक्यैस्तु देवताविशिष्टः सोमसंस्कारो विधीयते अव ३८

समुदायः सोमेन यजेतेत्यनेनानूद्यते तथा वदानवाक्येषु हृदयादिद्रव्यं श्रुतं ततोऽन्यविशिष्टा यागास्तत्र विधीयन्ते तदनुवादेन पश्वा

लंभवाक्ये ऽग्नीषोमरूपा देवता विधीयते तस्मात्स्वदान ५

दानवाक्यस्थपशुसंस्कारः सन्निमाधि० आहुतीस्तिस्र इत्यत्र कर्मैक्यमुत भिन्नता एकत्वसंख्या ख्याताऽऽत्मसंख्या आह प्राप्रयाजवत् आख्यातमात्रेणोमा
नेसंख्यया बहुकर्मता आह षडेकादशत्वनुप्रयाजेगतस्य भावनात् ः पशून्सप्तदश प्राजापत्यानि इत्यत्र भाष्यकृद्विचारमाह पूर्वत्र क्रियात्रित्वस्फुटत्वतः व
हुत्वोपनतपशुभिर्द्वियोगाद्भिन्नता तपश्चेतनकर्मैक्यं संख्यानात्र क्रियागता देवतासंगतस्य वतद्धितार्थस्य पश्चिमः बहुत्वसंगमात्रूपसंख्यया
तत्क्रियाभिदाति स्व आहुतीर्जुहोतीति अपेतत्र जुहोतीत्येनदाख्याते समिधो यजतीत्यादिश्व नाभ्यस्तं किंतु सकृदेवाम्नातं ततएकमिदं कर्म त्रित्वसं
ख्यातृतैषककर्मणा आह षट्सानेतव्याः पथाप्रयाजेष्वेकादशत्वसंख्यापचानामेवप्रयाजानामाह ष्ट्रानीतानित्यहदिति प्रोक्तक्रमः किमिदमाख्यातपदान्त
रनिरपेक्षमेव कर्मैक्यप्रमाणाभृत पदान्तरान्वितेनाथ ः वाक्यांशस्य पदमात्रस्य प्रमितिजनकत्वाभावात् द्वितीयत्रित्वसंख्याविशेषितेनाख्यातेन
कर्मबहुत्वं गम्यते प्रयाजानां नुपूर्वमेवपञ्चसंख्यावरुद्धत्वात् इष्टत्वमितरेणैकादशत्वं तु संपादइत्यत्वतद्विधितः पूर्वकर्मणाएकत्वसंख्यावरोधान्नास्ती
ति वैषम्यं तद्दृष्टत्रिकारोदाहरणं भाष्यकारेणानुमन्यते कर्मवाचिन आहुति शब्दस्य विशेषणान त्रिशब्देनकर्मबहुत्वस्य स्फुटतया एवंपशाव आ
प्यानात इदं त्वन्योदाहरणं सप्तदश प्राजापत्यान्पशूनालभत इति अत्र प्रजापतिर्देवता येषां पशूनां तत्प्राजापत्याः इति तद्धितस्य संतो बहुत्वो
पत्तापशवरणकेद्रव्ये तेनाद्रव्यैक्याद् द्वैतवशाच्च यागस्यरूपमभिन्नमिसेकमिदं कर्म यागुसप्तदशेति संख्या सा पशुद्रव्यगता न तु पूर्वोदाहृतत्रित्व
संख्येव क्रियागता न तस्मात्कर्मभेदं प्रतिपादयतीति प्रोक्तक्रमः अत्र प्रजापतिर्देवता यस्य पशोः स प्राजापत्य इति तद्धितान्तेन प्रातिपदिकेन स्वार्थ
पश्वात्मकहितांतन प्रातिपदिकार्थस्य प्रजापतिर्देवताविशिष्टस्य पशोः कर्मबहुत्वविवक्षायां उत्पन्ने इमे द्वितीयाविभक्तिवचने तत्र प्रत्ययमभा

बहु

त्व ये ४ पि

न्या॰ मा॰ ३८ विमाः द्वितीयाविभक्तेरेवतावन्नद्विनोत्पत्तिर्वेत्थं यामन्वयो नाभिकृतः पश्चादभ्यासेनो बहुवचनस्यैवं संततिः प्राजापत्येष्वनेनन्त द्वितां तत्प्राति
पदिकैनैकपशुद्रव्यमेकदेवतोपेतयागरूपं समर्प्यते तादृशानां रूपाणां बहुत्वाय बहुवचनेन बहूविशेषः सप्तदशेति निर्दिश्यते तस्मादत्र संख्यया
कर्मभेदः एवं सत्यष्टमेप्रस्मिन्नामाग्निसमदशायस्यानां मेकादशनिपशु गणाविकृतित्वमुपपद्यते अष्टमाधि॰ अथैष ज्योतिरित्यत्र गुणाद्वा कर्म
39 वा पृथक्त्वगुणः सहस्रदानात्मा ज्योतिष्टोमे स्येनसंस्तवः अथैष इति प्रकृते छिन्न एतच्छब्दोऽन्नगवेदेतत्संख्यं वा सकर्मत्वमिह नूतनसंज्ञया अथैष श्रि
ज्योतिरित्यैष विश्वज्योतिरित्येष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेति श्रूयते अत्र प्रकृते ज्योतिष्टोमे मेष ज्योतिरित्यनूद्यते स्मिन्सहस्र
श्रि दानलक्षणो गुणो विधीयत इति चेन्न प्रकृतस्य ज्योतिष्टोमस्याथसमेनेन छिन्नत्वात् न चैवं सत्येष ज्योतिरित्युक्त एतच्छब्दानुपपन्न इति वाच्यं
सन्निहितत्वं चिनैतच्छब्देनातीतसन्निहितस्य वागामिसन्निहितस्यापि परामर्शसंभवात्॰ आगामिसन्निहितश्च ज्योतिः शब्दार्थः स च ज्योतिः प्र
ष्टोमोऽतीतमपरामृशन् अपूर्वं संज्ञारूपत्वाच्च तेन किं विकर्माभिधत्ते तेन यथा पूर्वं च संख्यया कर्मभेदस्तथात्रापि संज्ञया कर्म विधीयते विश्वज्योतिः सर्व
ज्योतिः शब्दयोरप्ययमेवायोजनक्रमः नवमाधि॰ गुणः कर्मान्तरं वा स्याद्वाजिभ्यो वाजिनेऽत्रेतिगुणाद्देवतानन्वयात् समुच्चयविकल्पतः आमिक्षास
न्निशिष्टत्वात्सबलात् तत्र वाजिनगुणोऽपि शपकर्मान्तरत्वं पृथग्वाजिदेवकं । तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति श्रूयते घ वै
नीभूतः पयः पिण्डः आमिक्षा जलं वाजिनं तत्रामिक्षाद्रव्यभाजो ये विश्वेदेवा उक्ताः ते वाजिनस्य देवनेनानूद्यन्ते वाजोऽन्नमामिक्षारूपमेषामस्तीति तेनेति राम
प्यते तानन्नूद्य वाजिनद्रव्यरूपो गुणो विधीयते नन्वत्र द्रव्यमामिक्षाद्रव्यगासहसमुच्चीयताविकल्प्यतां वेति प्राप्ते ब्रूमः उत्पत्तिशिष्टेनामिक्षारू ३८

पेणाद्रव्येणावरुद्धे वैश्वदेवयागे वाजिनद्रव्यस्योत्पन्नशिष्टस्य प्रवेशाभावाद्वाजिनं वाजिशब्दार्थस्य देवतान्तरस्याभावात्पतिततो द्रव्यदेवतालक्ष
णास्वरूपस्याभिन्नत्वात्कर्मान्तरं ॥ द॰ मा॰ धि॰ दधिहोमस्य कर्मत्वं गुणत्वं वा मन्त्रपूर्ववत् । निर्गुणत्वादग्निहोत्रस्य कोऽप्यधिको गुणः । दध्ना जुहोतीति श्रू
यते तत्राग्निहोत्रं जुहोतीत्यतस्मात्प्रकृतात्कर्मणोऽन्यद्दधिहोमरूपं कर्मेति पूर्वन्यायेनावगम्यते यथा एवं च वाजिनद्रव्येण कर्माभिधेनन्तथा दधि
द्रव्येणापि चेन्नैवं यस्मात् यथा वैश्वदेवी यागस्त्वामिक्षागुणावरुद्धस्तथाग्निहोत्रं न गुणान्तरावरुद्धमस्तु तन्निर्गुणत्वाद्गुणाकाङ्क्षितत्वात् तस्माद्दधिगुण
विधिः एवं पयसा जुहोति साविश्रुद्धद्रव्यपयो दध्यादीनां सर्वेषामनुत्पन्नशिष्टत्वात् समबलत्वादेकैकेन द्रव्येणाग्निहोत्रं निष्पद्येत ब्रीहियववद्विकल्प
कृ। एकादशाधि॰ यद्दध्नेन्द्रियकामस्य जुहुयादिति तत्र यथा गुणो वाभिधेयते कर्म धात्वर्थस्यावलिप्तत्वतः मत्वर्थयोगो वादिष्मानाम्मलकर्म फलायतु गुणाविधे फै वा
यो धात्वर्थो विहितत्वादनूद्येत । दध्नेन्द्रियकामस्य जुहुयादिति श्रूयते तत्रेदं प्रकृतादग्निहोत्रादन्यत्कर्म नत्वत्र गुणविधिः कुतः इन्द्रियकामस्य तु क्तस्य म
फलस्य धात्वर्थमन्तरेण द्रव्यमात्रान्निष्पत्तेरिति चेन्नैवं कर्मान्तरविधौ दधिमता होमेनैन्द्रियं भावयेदिति मत्वर्थलक्षणाप्रसंगात् गुणविशिष्टक्रिया
वौ विधौ गौरवात्प्रकृतहोमानुवादेन प्रकृते क्रियाप्रसंगाद्गुणमात्रं तु फलाय विधीयते यद्यपि दध्ना जुहोतीति प्राप्तं तथापि फलसंबन्धानभावात् धात्वर्थस्या
नुफलत्वात्संभवतीति च नच अग्निहोत्रं जुहोतीति विहितस्य धात्वर्थस्यानूद्यमानत्वात् ॥ द्वादशाधि॰ उक्तोऽग्निष्टुतमनन्तसवारवतीयसामहिरण्यवती
स्वस्तु कले नित्यं प्रयुक्तं पशुफलकामे परेव सा दिष्टा कर्मान्तर्गताः पूर्ववद्गुणाः । रेवतीवारवन्तीयसंबन्धात् पशुषु साम्नोऽत्र फलकर्मभ्यां मेवेधवाक्य
भिन्नत्वात्तेनोक्तगुणासंयुक्तमन्यत्कर्मोच्यते फले ॥ त्रिवृदग्निष्टुदग्निष्टोमस्तस्य वायव्यास्वेकविंशमग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामा

न्या० मा०
४०

यजेतेत्यस्य सन्निधौ श्रूयते एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेतेति अस्यायमर्थः अग्निष्टोमस्य विकृतिरू-
पः कश्चिदेकाहोग्निष्टुन्नामकः स च षट्स्वपि स्तोत्रेषु त्रिवृत्स्तोमयुक्ततया त्रिवृदित्युच्यते अग्निष्टोमो ज्योतिरादीनां सप्तानां सोमसंस्थानामध्येग्निष्टो-
मसंस्थारूपत्वादग्निष्टोम इत्युच्यते प्रकृतौ तृतीयसवने आर्भवपवमानस्योपरि यज्ञायज्ञीयसाम गीयते तेन च साम्नाग्निष्टोमयागस्य समा-
प्यमानत्वादग्निष्टोमसामेत्युच्यते तच्च प्रकृतौ यज्ञायज्ञावोग्नय इत्यस्यां योगूयाषचरस्तु गीयते अस्मिंस्त्वग्निष्टुति ब्रह्मवर्चसकामेन वायव्या-
सु तत्साम गातव्यं तच्च प्रकृताविवेकविशास्त्रोक्तं पशुकामस्य तु रेवतीषु सधमाद इत्याद्या रेवत्यस्तासु वारवन्तीयं साम गायेदिति तत्र ध
रेवती नामर्चां वारवन्तीयनाम्नः साम्नश्चायं सम्बन्धः सोयं पशुफलायाग्निष्टुति विधीयते एतस्यैवेति प्रकृतपरामर्शकेनैतच्छब्देनान्यव्या-
वर्तकेनैवकारेण चाग्निष्टुतः समर्पणात् यथा पूर्वाधिकरणे इन्द्रियफलाय प्रकृतेग्निहोत्रे दधि गुणो विहितस्तद्वदिति प्राप्ते ब्रूमः
विषमो दृष्टान्तः दध्नो होमजनकत्वेन प्राप्तगुणबोधनीयं तस्य लोकतो वगन्तुं शक्यत्वात्फलसंबन्ध एव शास्त्रबोध्य इति न तत्र वाक्यभेदः इह
तु रेवत्याधारकवारवन्तीयसाम्नोग्निष्टुत्कर्मसाधनत्वं फलसाधनत्वं चेत्युभयस्य शास्त्रैकबोध्यत्वाद् दुर्वारो वाक्यभेदः तेन पशुफलकं
यथोक्तगुणविशिष्टकर्मान्तरमत्र विधीयते एतच्छब्दस्त्वेवकारश्च विधीयमानकर्मान्तरविषयतया योजनीयौ त्रयोदशाधि० इष्टं यत्स्वर्ग
कामानां सोमान्तेऽभीरितं निषादानामपि हीष्टिः स्यादिति इष्ट्यादिकामिनां फलान्तरं किमिष्ट्यादिहीनादीनामुत हीनतेत्यभेदफलत्वं संमिन्नेति राम:
धनं चिनियमस्तत्फलान्तरं रेवतुर्थ्यां कुष्टिकमापहीषितिसोमरसफलं वृहिर्ष्यितु तथा विवर्द्धते नोक्त इष्ट्यन्तकामानामन्यत्वेप्रसमि ४०

40

+ स हीषिति निधनस्य च फलभूते वृष्टी भवतः तद्भावमेतन्नाम्ना हतीरुक्तिरिति प्राप्नुमः सौभरे ६

तथा नियमेपि चतुर्थ्यो बाला दर्थ्यादुपपद्यते ५ यो वृष्टिकामो यो ऽन्नाद्यकामो यः स्वर्गकामः स सौभरेण स्तुवीत सर्वे वै का-
मः सौभरमिति समाम्नाय पुनः समाम्नातं हीषिति वृष्टिकामाय निधनं कुर्यादूर्गित्यन्नाद्यकामाय ऊ इति स्वर्गकामायेति
सौभरं नाम सामविशेषः निधनं नाम पंचभिः सप्तभिर्वा भागैरुपेतस्य साम्नो ऽन्तिमो भागः तस्मिन्निधने हीषादयो विशेषाः
सौभरसामसाध्यस्तोत्रफलेभ्यो वृष्ट्यादिभ्यो न्यानि वृष्ट्यादिफलानि जनयितुं विधीयन्ते कुतः हीषादिविधिका यो वृष्टि
कामायेत्यादिना चतुर्थीश्रवणात् तादर्थ्यं ब्रुवती हीषादीनां वृष्ट्यादीनां वृष्ट्यादिकामपुरुषशेषत्वं गमय
ति तच्छेषत्वं च पुरुषाभिलषितफलसाधनत्वे सत्युपपद्यते ततः सौभरविधौ यो वृष्ट्यादिकामः स एव हीषादिवि
धौ पुरुषो ऽभिज्ञायते ततः सौभरस्य फलभूता ये वृष्ट्यादयः त एव हीषादिवाक्येष्वनूद्यन्त इति न फलान्तरे ष्वधोच्येत
नूतनफलान्तराभावात् हीषादीनां च नानाशाखाध्ययनादेव सौभरे प्राप्तत्वादनर्थको ऽयं विधिरिति तत्र फ-
लत्रयकामानां त्रयाणामनियमेनैव हीषादित्रितयमध्ये यस्य कस्यचिन्निधनस्य प्राप्तौ विधेर्नियमार्थत्वात् ताद-
र्थ्यं तु फलान्तराभावेपि सौभरवाक्योक्तवृष्ट्यादिफलसाधने सौभरे हीषादीनां नियम्यमानत्वादुपपद्यते तस्मा
दयं निधनविशेषनियमः न विधिः इति माधवीये जैमिनिन्यायमालाविस्तरे द्वितीयाध्यायस्य द्वितीयः पा
दः समाप्तः तृतीयपादस्य प्रथमाधिकरणमारचयति रथन्तरे साम सौमे भवेद् बृहज्जगत्योरुताय
वशुक्राग्रयणाग्रग्रहाः स्तुताः रथन्तरादि संयुक्तमन्यकमो यवाग्रयणः गायत्रादिपुताः स्युर्वादन्यद्याव
द्वितो गुणेः सोमशब्दप्रकरणे ज्योतिष्टोमसमर्पके ग्रहाग्रलेगुणत्वं व्याव हितस्तु परस्परं ३ ज्योतिष्टोम

41

प्रकरणे श्रूयते यदि रथंतरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयात् यदि बृहत्सामा शुक्राग्रान् यदि जग
त्सामा आग्रयणाग्रानिति तत्र सोमशब्देन सोमलतासाधनको यागो विधीयते तस्मिंश्च यागे माध्यंदिने सवने पृ
ष्ठस्तोत्रे रथंतरबृहज्जगत्याख्यानि सामानि विकल्पेन विहितानि अभि त्वा शूर इत्यस्यां योनावुत्पन्नं रथंत
रं त्वामिद्धि हवामह इत्यस्यामुत्पन्नं बृहत् जगतीछन्दस्कायामुत्पन्नं जगत् ऐन्द्रवायवो मैत्रावरुणः आश्वि
नः शुक्रो मन्थ्याग्रयण उक्थ्यो ध्रुव इत्यादिनामकाः ग्रहाः प्रातःसवने गृह्यन्ते दारुपात्रेषु सोमरसस्य ग्रह
णात् ग्रहा भवन्ति सोमयागस्य रथंतरसामोपेतत्वपक्षे एतेषु ग्रहेष्वैन्द्रवायवः प्रथमं गृहीतव्यः बृहत्सा
मोपेतत्वपक्षे शुक्रः जगत्सामोपेतत्वपक्षे आग्रयणः प्राथमिक इति त्रिष्वपि वाक्येषु तत्र प्रकृतो ज्योति
ष्टोमो गायत्र्यादिसामोपेतः तद्व्यावृत्त्यर्थमिह रथंतरादयो गुणाः श्रूयन्ते तस्मादैन्द्रवायवाग्रत्वादिगुणो
पेतानि कर्माण्यत्र विधीयन्त इति प्राप्ते ब्रूमः यदि रथंतरसामा सोमः स्यादित्युक्तो यः सोमशब्दस्तेन प्रकरणो
न्नयाज्ज्योतिष्टोमः समर्प्यते समर्पिते तस्मिन्नपूर्वे ग्रहाग्रत्वे गुणो विधीयते न च रथंतरादिगुणानुवादेन ज्यो
तिष्टोमस्य व्यावृत्तिः संभवति तस्य प्रातःसवनादौ गायत्र्यादिसामोपेतत्वेऽपि पृष्ठस्तोत्रे रथंतरादियोगस्या
पि सद्भावात् किं तर्हि व्यावर्त्यत इति चेत् रथंतरबृहज्जगतां परस्परं व्यावृत्तिरिति वदामः रथंतरादयः पृ
ष्ठस्तोत्रे विकल्पिताः तत्र रथंतरानुवादेनेतरौ पक्षौ व्यावर्त्येते एवमितरत्रापि तस्माद्गुणविधिः ननु येऽत्र प्रकृ
तो ज्योतिष्टोमः सोऽन्येषां सोमयागानां प्रकृतिः न हि प्रकृतौ जगत्सामत्वमुत्पन्नं सामविहितमस्ति अत एव दशमाध्याये
पंचमपादस्य पंचदशाधिकरणे प्रथमवर्णके यदि जगत्सामेति वाक्योक्तमाग्रयणाग्रत्वं विकृतौ विषु ॥ राम

वन्नामकेमुख्येऽहनिव्यवस्थापितेवाऽहंतस्थापिनाग्रकाष्ठाद्विरोधः॥ आग्रयणाग्रत्ववाक्यंनकर्मान्तरविधायकंकिंत्वन्येनविहित
सोमप्रयोगेप्रत्रजगत्सामभवतितत्रगुणविधायकमित्येतावन्मात्रस्यप्रतिपाद्यत्वात् द्वितीयाधि० राजसूयप्रकरणेऽवेष्टिरवे
साख्याश्रुतात्रतुविप्रक्षत्रियविड्भेदाद्धविषांव्यत्ययः॥ क्रमेविप्रादेरनुवादः स्यात्प्राप्तणेवानुवादगीः ख्यस्यापत्रया
णांचराजत्वात्प्राप्तिरस्तिहिनराज्ययोगाद्राजत्वंहन्त्रियत्वेतुतंन्नुतः॥ अप्राप्तप्रापणात्तस्मान्नरपतेरतुल्यता राजसूय
प्रकरणेकाचिदिष्टिरवेष्टिर्नामिकाश्रूयते॥ आग्नेयमष्टाकपालंनिर्वपतिहिरण्यंदक्षिणाऐन्द्रमेकादशकपालमृषभो
दक्षिणावैश्वदेवंचरुंपिशंगीपृष्ठौहीदक्षिणामैत्रावरुणामिक्षांवशादक्षिणाबार्हस्पत्यंचरुंशितिपृष्ठोदक्षिणेतित
स्यामेवेष्टौहविषांक्रमव्यत्ययःश्रूयतेयदिब्राह्मणोयजेतबार्हस्पत्यंमध्येनिधायाहुतिंहुत्वातमभिघारयेद्यदिराज
न्योऐन्द्रंयदिवैश्योवैश्व[illegible]देवमितितत्रपर्यायस्त्वाधिकरणेऐन्द्रायापवाग्रत्वंव्यवस्थापयितुंयदिशब्दप्रयुक्तेनवाक्येन
रथंतरनिमित्तत्वेनानूदितंएवमत्रापिपंचमस्थानेश्रूयमाणंबार्हस्पत्यचरुंमध्येतृतीयस्थानेस्थापयितुंयदिब्राह्म
णःस्यादिनिमित्तत्वेनानूद्यतेद्वितीयस्थानेश्रुतस्यैन्द्रस्यतृतीयस्थानेवस्थापयितुंयदिराजन्यःस्यादनुवादःवैश्वदेवस्य
तुस्वतएवतृतीयस्थानेश्रवणात्तन्मध्येनिधानविधिर्निसानुवादःननुराजकर्तृकेराजसूयेब्राह्मणवैश्ययोर्प्राप्त्य
इति भावान्नानुवादोयुक्तश्चेन्नतयोरपिराज्ययोगहेतुकतराजशब्दप्रयुक्तत्वादितिप्राप्तेब्रूमःराजशब्दःक्षत्रियजातौरूढोनतु
राज्ययोगस्तस्यप्रवृत्तिनिमित्तंप्रसुतराज्यशब्दस्यराज्ययोगःप्रवृत्तिनिमित्तंराजकर्तृकेमेतिविग्रहात्राजप्रतिपादिकस्यो
पस्थितस्ययविशेषविधानात्ब्राह्मणवैश्ययोःप्रजापालनेनराजशब्दःउपचरितःतस्मादवेष्टौब्राह्मणवैश्ययोरेवम
प्राप्तावनेनवचनेनप्राप्यतेननुराजसूयस्यराजकर्तृकत्वात्तदंतर्गतायाअवेष्टेरपितत्त्वात्तस्यांब्राह्मणवैश्य

वैध्या
र =
गर्भिणीः

योऽप्युपाणामप्युक्तमिति चेन्मैवं अंतरवेशेऽतदसंभवे विराजस्याहुतिः वपुस्यमानायामवेशेऽतत्संभवात् तस्मादत्र ब्राह्म
णादिकर्तृके य पयो कृगणविशिष्टे कर्मान्तरे विधीयते इति नरथ्येतरादितुल्यत्वेऽपदिशस्तु निपातत्वादनर्थको ऽपी
तरवाची वाऽस्तु तत्रैव तृतीयाधिकरणमारचयति वसंते विप्रस्त्रादध्यात्त्रैवोपनयीत तन्मनुवादः प्रापत्त्वैवानु
वादः कालसिद्धये अंतरेणाग्निविद्याभ्यां कर्मानुष्ठानसंभवात् तत्र्वैआधानोपनीतिप्राप्ताविप्राद्यपस्ततः लौकि
काग्नेः पुस्तकाच्च तत्सिद्धेर्नास्ति कल्पने कालविशेषादिविद्धकमतो प्राप्तविधीयते वसंते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे
राजन्यः शरदि वैश्य इति श्रूयते वसंते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यमिति च तत्र वसंतादिकालविशेषविवि
धानेषु ब्राह्मणादयो नूद्यंते न च ते वा प्राप्त्यभावः कर्मानुष्ठानाय आवश्यकत्वात् न ह्यात्र साधारणस्तन्निम
नुष्ठानप्रकारज्ञापिको विद्यां च विना कर्मानुष्ठानं संभवति अग्निश्च नाधानमंतरेणास्तीति ब्राह्मणादिकर्तृकमाधा
नं कल्प्यति विद्या चोपनयनपूर्वकाध्यापनमंतरेणासंभवंती ब्राह्मणाद्युपनयने कल्पयतीति तत्र प्राप्तिरिति
चेन्मैवं लौकिकाग्नेहोतुं पुस्तकपाठेनापि गंतुं च शक्यत्वेनाधानोपनयनयोरकल्पने ब्राह्मणादीनामप्रा
प्तेः तस्माद्वसंतादिकालविशिष्टे ब्राह्मणादिकर्तृके आधानोपनयने विधीयेते चतुर्थाधि यद्दाक्षायणय
ज्ञेन स्वर्गकामो यजेत तत्र कर्मान्तरं गुणो वोक्तदृशब्दो फलसिद्धये गुणस्याप्रसिद्धत्वात् कर्मभेदो वा संज्ञया गुणोपस
विशेषाभ्यामावस्यारख्येन नाम तत्र २ दर्शपूर्णमासप्रकरणे श्रूयते दाक्षायणयज्ञेन स्वर्गकामो यजेतेति तत्र दा
क्षायणशब्दवाच्यस्य कस्यचिद्गुणस्य लोके प्रसिद्ध्यभावाड्ड्रिदादिवद्वाजिसामानाधिकरण्येन कर्मनामत्वादये

स्याप्रकृतः प्रकृतो दर्शपूर्णमासात्मको ज्ञेयो दाक्षायणयागः आवृत्तिप्रकार

स्या

स्तुहुं पौर्णमास्योपजनं तदेहुं अमावास्येष्टा इत्यादिवाक्यशेषाद् एवगम्यते ततो दध्यादिवत् असिद्धार्थत्वाद् दर्शपूर्णमासयोः प्रकृतयोः स्वर्गफलसिद्ध्य
र्थमाह्वान्मारब्धगुणविधिः न तु श्रिदादिवत् कर्मनामधेयं एवं साकंप्रस्थाय्येन यजेत पशुकाम इत्यापि द्रष्टव्यं अमावास्यायां हि द्वौ दोहौ संपाद्य
तस्मिन् दधिपयसोः कुम्भीनाम सह प्रस्थापनं साकंप्रस्थाय्यः तद्युक्तोयं दर्शयागः साकंप्रस्थायीयः तथा सति प्रकृते दर्शयागे पशुफलाय साकंप्रस्था
य्यारब्धगुणो विधीयते पयमाधि० वायव्यं श्वेतमालभेत भूतिकाम इत्येवं सौर्यं चरुं तथा निर्वपेद्ब्रह्मतेजार्थमीषामुष्टिनिरूप्ते पौर्णमास्यां श्वेतं चरुं किंवा यावत्कल्पित
कर्मणि फलार्थं द्रव्यापायो विशिष्टो विहितो विह श्वेतं वा पुरुषेणीयाया माग्नेयं चरुं विश्वे चरुगुणाश्चक्ष्याली निर्वापस्तु तदाश्रितः फलहानेन तत्कि
तुपाव स्वास्थित कर्मतत्त्वं स्यादिरूपं संपत्तेर्वायव्यायां गतार्थिका । ४ अनारभ्य दमाम्नायते वायव्यं श्वेतमालभेत भूतिकाम इति सौर्यं चरुं निर्वपेत् तत्र
ब्रह्मवर्चसकाम इति च तथा दर्शपौर्णमासयोरिदमाम्नातं ईषामालभेतेति चतुरो मुष्टीन्निर्वपतीति च ईषा शकटाङ्गं तां लांगलं रेखावहोर्धः काष्ठविशे
षः तस्याश्वालम्भः स्पर्शः तेनैतत्पौर्णमासगतमीषालम्भनं घृतस्यामालभ्यायामीषायां श्वेतलक्षणो विधीयते तस्य च श्वेतकाष्ठस्य वायुना संस्पर्शमा
नत्वाद्वायव्यनाम भवति तथा चतुर्मुष्टिनिर्वपणाम् न घ चरुगुणालेन विधीयते चरुः स्थाली सा च निर्वापस्याश्रयः निरूप्तस्य हविषः आग्नेयत्वत्तथा सूर्य
वत्प्रभासंबन्धात्सौर्यत्वं भूतिब्रह्मवर्चसफले च सर्वकामिके दर्शपौर्णमासयोः पूर्वस्मिन् हृदि गुणानन्वये तेन तस्मात् गुणविधी इत्येकः पूर्वपक्षः न हि फलप
दयोर्नित्यवस्तुतयोः संभवत्प्रयोजनयोः स्वपासिकानुवादत्वमानर्थक्यं चाऽऽके तस्मात् गुणफलविशिष्टकर्मान्तरे विधीयेते तदापि यागस्याश्र
वणादालम्भनिर्वापयोरेव श्रवणाद्यथावदुक्तकर्मविधिरिति द्वितीयः पूर्वपक्षः श्वेतपशुचरुद्रव्ययोर्वायुसूर्यदेवतयोश्च स्पष्टं प्रतीयमानत्वा

न्या॰मा॰ रूपवतोर्यागयोरार्थिकयोर्वा रपि तु मध्यकत्वात्तद्द्रव्यदेवताविशिष्टयोर्यागयोर्विधिरभ्युपगंतव्यः भूतिकामो वायव्यमालभेत तेन पशुना यजेत ब्र
४३ ह्मवर्चसकामः सौर्यं चरुं रागाय जेतेत्येवंविधोर्थः सिद्धो विधिः द्रव्यदेवतासंबंधकल्पितस्य यागस्य लिङ्प्रत्ययेन कर्तव्यता विधावालभनिर्वाप
योर्धात्वर्थयोः का गतिरिति चेत् अनुवाद इति ब्रूमः तस्मात्स्त्वार्थिकी निर्वापालंभावंतरेण तन्न यागासिद्धेः तस्माद्यागविधिरिति राद्धांतः
षष्ठाधि॰ वत्सालंभोपजिस्पर्शो वा वायव्यादिवद्यजिः स्पर्शः सोहवराहिसात्संस्कारः प्रायपाठतः अग्निहोत्रदोहाधिकारे श्रूयते वत्सं मा
43 लभेतेति तत्र विमतो वत्सालंभो यजिः स्यात् प्राणिद्रव्यकालंभत्वात् वायव्यालंभवदिति चेन्न देवतारहितत्वेन तद्धेष्ययात् किंचाप्रायं वत्सालंभोग्निहो
त्रागसंस्कारः तत्प्रायपठितत्वादितरसंस्कारवत् तस्मात्स्पर्शमात्रविधिः सप्तमाधि॰ चरुर्भवतीति नैवारउपधेयश्चरुर्भवतीति यागः स्यादुपधानं वा
यागः शेषात्कदेवतः यागत्वानिश्चये शेषोन्नापेक्ष्यो नापयजिः कुतः किंत्वपधानमात्रं त्वपावदुक्तं चरोस्थितेः ३ अग्नेर्व्यो श्रूयते नैवारश्चरुर्भवतीति चरु
मुपदधातीति च तत्र नीवारचरुद्रव्यको यागो विधीयते न तत्र देवताया अभावः इहस्पतेर्वा एतदन्नं यन्नीवारा इति वाक्यशेषे देवतासिद्धेः उप
धाने तूपयोगाय पूर्वकस्य प्रतिपत्तिः स्विष्टकृदादिवदिति प्राप्ते ब्रूमः यागविधौ निश्चिते सति पश्चाद्देवतायामपेक्षितायां वाक्यशेषवलाद्देवताक्लृप्तिः
इह तु देवताकल्पनेन यागविधित्वनिश्चय इत्यन्योन्याश्रयः तस्मादिहोपधानमात्रं विधीयते अष्टमाधि॰ पर्यग्निकृतं पात्नीवतमुत्सृजतीत्यसौ
यागो गुणो वा यागः स्याद्द्रव्यावधानतः १ मत्समितातमालभ्य मन्त्रेणोत्सर्गाशुकृतः गुणार्थं पर्यग्निकृतसांग्रवकृत्वा त्रानिष्टत्वेपरत उत्सर्गापरिसंख्या ४२
वचोत्सर्गाद्यागविधौ सति पर्यग्निकरणान्ता कुर्वीतेति स्पष्टोपकारतः २ त्वाष्ट्रं पात्नीवतमालभेतेति प्रकृत्य समाम्नातं पर्यग्निकृतं पात्नीवतमुत्सृ

जतीतितत्रपर्यग्निकृतशब्देनसंस्कृतपशुद्रव्यस्यपात्नीवतशब्देनपात्नीवन्नामकदेवतासंबंधस्यचप्रतीयमानत्वाद्यागविधिः एवंसतिपर्य
ग्निकृतपात्नीवतशब्दयोरुभयोरवहितान्वयोरनयोस्तेसिद्धांततोपर्यग्निकृतमुत्सृजतीत्यन्वयंवाक्यंतितत्रायमवहितान्वयोद्वारः तस्माद्यागपशुवद्या
गविधिरितिशास्त्रक्रमः अनारभ्याधीतत्वान्नास्तिवाक्यस्यप्रकृतपशुसंनिधानाद्दुर्बलत्वमपेक्षितेनप्रकृतः पशुःपात्नीवतक्रतेनप्रत्यभिज्ञापयतेनमनूद्यप त२१
र्यग्निकृतशब्देनोत्सृजतीत्यनेनपर्यग्निकरणत्यागगुणोविधीयते नचप्रकृतिगतस्यपर्यग्निकरणस्यविकृतौचोदकेनप्राप्तत्वादनर्थकोऽयं
विधिरितिवाच्यंउपरितनांगानामनुत्कर्षविधिप्रयोजनत्वात् नन्वेवंसतिपरिसंख्यास्यात्तस्यांचदोषत्रयदुष्टत्वात्स्वार्थत्यागोऽन्यार्थस्वीकारःप्राप्तबाधश्चेति
त्रयोदोषाः पर्यग्निकरणवाक्यस्यार्थोविधिस्तदुपरतम्भार्थोनिषेधःस्वीकृतश्चचोदकप्राप्तोपरितनाङ्गानिबाध्येरन् मैवंपर्यग्निकरणोत्तरभाविनांम
ङ्गानामनुष्ठानानीत्यतस्तत्परिसंख्यायामनङ्गीकारात् कथंतर्हितन्निवृत्तिः आर्थिकीतिब्रूमः चोदकप्रवृत्तेःप्रागेवायंविधिःप्रवर्ततेप्रत्यक्षोपदेश
श्री स्यशीघ्रबुद्धिजनकत्वात्कल्पनात्तदर्थात्प्रबलत्वात् तथाचसमुपदिष्टैरेवाङ्गैर्निराकाङ्क्षायांविकृतौचोदकस्याप्रवृत्तेरवोपरितनानामङ्गानांनप्राप्तिस्तेनचो
देनप्राप्तेनपर्यग्निकरणानन्तरभाविनामङ्गानामप्राप्तिरितिवाच्यं विधीयमानस्यपर्यग्निकरणस्यान्यतनत्वेसत्युपकारकस्यनापूर्वस्यप्रकृतावुपलब्धेरुपका
रपर्यग्निकरणंतत्स्वस्थानेस्यैवात्रविधेयत्वात्प्रकृतौचप्राचीनाङ्गानन्तरभाविनांवोपकारः कृत्स्नस्यात्रापिनादृशस्यैवविधानात्पर्यग्निकरणा
न्तारीतिः सिद्धान्तिएवंचसत्युत्सृजतीत्यनेनपर्यग्निकृतपर्यग्निकरणविधानार्थंसिद्धंउपरितनांगानांत्यागोऽधातुनानूद्यतेनतेदवमत्रगुणविधिः
नवमाधि० पदद्यंसंगृहीतेतिगृहस्थास्तुश्रितिवद्वयंतद्यागोवागुणोगायाः स्याद्दशमंशुनामतः ग्रहयोरेवनामस्याद्राद्यन्ततपि द्विधितयोः

न्या॰मा॰ ४७ गुणोत तस्यवाक्येनज्योतिष्टोमाभिगामिता २ अनारभ्याश्रूयते एषवैहविषाहविर्यजति योदाभ्यंगृहीत्वासोमाययजतइति परावाएतस्यायुः
प्राणएति योंशुंगृह्णातीति चात्रादाभ्यांशुग्रहौश्रूयेते तिरात्रिवत्तत्र पूर्वेनामत्वान्नाम्नासोमकार्योयागोयजतस्मात्तेनविधीयते अंशुमिमंत्र्ययजेतेत्य
वशोपिनामविशेषवत्त्वाद्देवापूर्ववद्यागविधिः नचात्रद्रव्यदेवतयोरभावः ग्रहशब्देनज्योतिष्टोमविकृतित्वावगतेस्तद्धर्मविधानात्तद्देवतानिर्देशान्नतस्मिन्दे
रितिप्राप्तेब्रूमः भवत्वदाभ्यांशुशब्दयोर्नामत्वं तेनामनीग्रहयोरेवप्रसिद्धेनतु यागयोः गृहीत्वेतिशब्दस्यानन्तरमेवपाठात् यजतिस्तुव्यवहितः ना
44 मशब्दोपि यजिरंशुवाक्येनास्ति तस्माद्ग्रहयोरेवात्रविधिः ग्रहणंचज्योतिष्टोमगतसोमरसस्यसंस्काररूपोगुणः तद्वापद्ग्रहणसमानत्वात् एवमत्र
नप्रकृतज्योतिष्टोमस्तूयापितत्संबंधिग्रहणद्वारावाक्याज्ज्योतिष्टोमप्रकरणमित्यंवगतम् एवंसोमायदाभ्यंगृहीत्वेतिनिर्दिश्यते अथयदुक्तंत्रिरात्रिपारायणषष्ठके
३ षष्ठप्रपाठकेप्रकरणे विनियोजकवाक्याद्दृष्टवंतस्माज्ज्योतिष्टोमगुणविधिः दशमाधि॰ अग्निचित्तनद्व्यस्ययागोवासंस्कृतियजिः लिंगे
नयागनामत्वाद्यजिनाचानुवादतः १ रूपद्व्यस्यनामेतद्वन्हेरायानवचितिः संस्कृतिसंस्कृतेवन्हावग्निष्टोमाविधीयते २ । यएवंविद्वानग्निंचि
नुतइत्येवंविधायश्रूयते अथातोग्निमग्निष्टोमेनानुयजंतितमुक्थ्येन तंषोडशिनातमतिरात्रेणेत्यादि । अत्राग्निशब्दोयागवाचीस्तोत्रशस्त्रादि
कृत्लिंगस्यश्रूयमाणत्वात् तच्चलिंगमेवंश्रूयते आग्नेःस्तोत्रं आग्नेःशस्त्रमितिषडुपसदोग्नेश्चित्यस्यभवंतीतिच यदिलिंगंप्रापकायेसंतर्हियानि
नानदनुवादः प्रापकास्तु अग्निमग्निष्टोमेनानुयजंतीत्यतस्मिन्वाक्ये ऽग्निंयजतीतियजिसामानाधिकरण्यादपानुयजंतीतिवद्यागनामत्वेप्राप्ते राम॰
चयतानशब्दस्याग्निशब्देनान्वयादग्नेर्ज्योतिष्टोमस्यचितस्याग्नेः प्रयोजनेसत्यग्निष्टोमस्यानुयजनेसंभवतिदेवदत्तमनुगच्छतियत्तस्त्वरस ४७

त्रैदेवदर्शनपूर्णमासयोरागमनदर्शनात् तस्मादग्निंचिन्वीत इत्यत्राग्निनामको यागोख्यातेन विधीयते चिनोतिस्त्विष्टकाभिरग्निं चिन्वीत इति वाक्यान्तरस्य चयनस्य
सोमयागविकृतित्वेनान्तस्य ग्रहसमुदायस्येवाग्नेर्वा दूरतिमात्रत्वम: अग्निशब्दस्य चाग्निद्रव्यमात्रे प्रसिद्धेः प्रत्यक्षमतपालिंगाद्विकल्पायागवाचि
त्वाद्वितीयमिति न यागनामत्वेन चात्र यागरूपमस्ति द्रव्यदेवतयोरसिद्धेः अतोग्निमादधीतेत्युक्ताधानवदग्निं चिन्वीत इत्युक्ते चयनमग्निद्रव्यसंस्कार
: न चैवं सत्यस्य विनियोगाभावः अग्निमग्निष्टोमेनयजन्तरस्याहितायैरग्निष्टोमादौ विनियोगात् तस्मात्संस्कारविधिः ॥ एकादशाधि॰ मासमग्निहोत्रं जुहोतीत्यग्नि
होत्रगुणाम्नानमेवाग्नेयः अनूद्यप्राप्तकर्म्मात्रमासोयामतो विधीयते उपसन्मिश्रस्त्वरितत्वे तितिनिसतासामसंभवात् अनेकस्य विधेश्चान्यत्कर्मप्रकरणा
न्तरात्वे कुण्डपायिनामयनेऽप्यते मासमग्निहोत्रं जुहोति मासं दर्शपूर्णमासाभ्यां यजेतेति अत्र श्रोतं नित्याग्निहोत्रमनूद्य मासगुणसह गुणोऽप्राप्त
त्वाद्विधीयत इति चेन्नैवं किं मासमेव विधीयत उतोपसन्मिश्रस्त्वरितत्वेसुक्ताउपसदोपि नाद्यः उपसदामपि नित्याग्निहोत्रधारिणः नाराहित्वमतो विधा
तव्यत्वात् न द्वितीयः प्रोक्तदोषकर्मणापनेकगुणविधौ वाक्यभेदापत्तेः ननु मासस्यैव हि गुणविधिः कर्मान्तरत्वे किं प्रमाणमिति चेत् प्रकरणान्तरमिति ब्रूमः
नैवं नित्याग्निहोत्रस्य प्रकरणं अत्र सन्निहितत्वात् अयनत्वेन तत्प्रकरणं अयनेमाराभ्याधीतत्वात् कातर्हि नित्याग्निहोत्रे विधिशंकेति चेत्तत्प्रकरणा
म्नातमर्थकत्वेप्यग्निहोत्रशब्देनैतत्समर्पणादेशाशंकाभवति सा च वाक्यभेदापत्त्या निराकृतान्नत्वामर्जितस्ततः सिद्धं प्रकरणभेदेनिराकृतेप्रकरणे
कायात्वेन गुणविधाप्यसिद्धेरेतस्याग्निहोत्रशब्दस्य शक्तो निरूढापाततदवस्थः प्रकरणभेदान्नित्याग्निहोत्रादिदं कर्म भिन्नमित्यग्निहोत्रशब्दोपि
मातिदेशार्थः इति सप्तमे वक्ष्यते तत्र उपसन्मासाभ्यां विशिष्टमिदं कर्म विधीयते तेनोवाजिनमामनगुणाभेदात्कर्मभेदोनप्रकरणभेदादितिच न्त्रै

न्या॰मा॰ ४५ यस्मात् उपादेयत्वपाविषेयो गुणो वाजिनं मासस्तनुपादेयद्रव्यकं वैषम्यं द्रव्यत्वेन रूपान्तरगते वाजिनं मासेनानतेयत्त परत्रैव वैषम्यं परमार्थेन स्त्व
त्वप्रथमतरप्रतीतेन प्रकरणभेदेन सिद्धं कर्मभेदं गुणउपोद्बलयति ततः प्रकरणान्तरमेव त्रत्र कर्मभेदहेतुः द्वाशपाधि॰ अष्टाकपालमाग्नेयं कुर्यात् कामः आह
ते फलैकमोमहाफलेभानान्तर्वेनापाप्रवेशनात् मासमृन्निन्दान्यप्रकरणकर्मान्तरप्रसन्निधिः अनारभ्याधीतमेतद्रूपं लभ्यनमीमांसते २ अनारभ्या
धीते आग्नेयमष्टाकपालं निर्वपेद्रुक्कामः इतिरुक्कामस्तेजस्कामः अवेष्टीनां प्रकृतिभूतदर्शपूर्णमासगतत्वमाग्नेययागमनूद्यतत्रतेजस्काम
45 रूपं फलं विधीयते कुतः वाक्येनाग्नेयफलसंबंधस्य भासमानत्वात् न च पूर्वोक्तमासाग्निहोत्रन्यायेन कर्मान्तरत्वे वैषम्यात् तत्राप्येनमारभ्याधीतत्वा
दन्तिमप्रकरणान्तरत्वं इह त्वनारभ्याधीतत्वेन प्रकरणमेव नास्तीति कुतो प्रकरणान्तरत्वं किं च मासानुपादेयः अग्निहोत्राजसाराणां पादपि गुणप्रश
वयत्वात् फलेतूपादेये हृ दर्शपौर्णमासिकाग्नेयानुसारेणाते जसः कामयितृशक्यत्वात् तस्मात्फलविधिरिति प्राप्ते ब्रूमः प्रकरणान्तरत्वाभावे
प्यनारभ्याधीतत्वात् सन्निधिरस्त्येव प्रमाणवाक्यकर्मविनियनोचाग्राजिनन्यायेन कर्मभेदः अष्टाकपालत्वाग्निदेवतात्मनो रूपसाम्येऽप्येक वि
धत्वात्यदि प्रकरणान्तरत्वमप्यसन्निधिकृतमिस्सन्निधिरेव मासाग्निहोत्रकर्मभेदहेतुः तर्हि तन्यायवात्येप्येवोत्तु फलं च मासवदनुपादेयं अन्यथा
साधनवद्रूपफलप्रमाणात् कामनाविषयसौदर्यज्ञानात्वतराणोसंघतेनेनृविधिः अवणात्यपवते यद्यधिकरणपान्नाय भेदः यदिवान्यापि वंस
वेयात्तेजस्कामेष्टिः कर्मान्तरं काम्येष्टिकाण्डपठितेष्वैन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकाम इत्यादिष्वयमेवन्यायो द्रष्टव्यः ३ पाद॰श॰अधि॰ यजेत स राम
मेषौर्णमास्यामावस्यायां स्वर्गकामः तथा अन्नाद्यकाम इत्यादौ कर्मभेदोऽथवा गुणः विधुणादानयोरैक्यात् दृशादेरनुपतितः आवरणे के कर्मविधीतम्॰ ४५

दः पुनरुक्तितः देशादियोगस्याप्राप्तेर्विधिर्नैयेकत्तान्तयोः पुरुषशाहृत्याश्रितित्वात्पुनरुक्तत्वात्तन्नूयते ३ दर्शपूर्णमासप्रकरणे देशकालनिमि
त्तान्याम्नायन्ते समेयजेत पौर्णमास्यां यजेत यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति श्रवेष्टिप्रकरणे फलमाम्नातं न च यो ऽन्नाद्यकामः यजेयेदिति श्रा
द्दिशब्देन सत्कोराग्रहीतः स च दर्शपूर्णमासप्रकरणे समाम्नातः शेषं स्विष्टकृते समवद्यतीति तन्त्रे देशकालनिमित्तफलसंस्कार्याश्चानुष्ठेयत्वादनुपा
देयाः अतएव न विधेयाः उपादानविधिशब्दोपयोः पर्यायत्वात् ततः कर्मविधिरिस्वरूपमप्येयं तत्र प्रकरणान्तरो दर्शादेः पूर्वविहितस्यैवेमितिवाक्यैः पु
नर्विधाने सन्निधापयन्तीत्यादि वरस्मात् आद्वे च कर्मभेद इति योगसूत्रम् देशादीनाम विधेयत्वेपि विहितकर्मणामहं तेषां संबंधो विधीयतां मत्वकर्मेव स्व
र्वं विहितरूपमात्माद्विधिमर्हेति यदुक्तमुपादानविधिशब्दोपर्यायविविततदसत् अप्रवृत्तप्रवर्तने विधानेतन्तपुरुषविषयः शब्दव्यापारः अनव
स्थितस्यानुष्ठानमुपादानं तत्तु कर्मविषयः पुरुषव्यापार इति महान्भेदः योपि दर्शादीनां पुनर्विधिः सोपि देशादिसंबंधविधानेन कर्मोगेवाद्रेइति न कर्मभेद
मावहतिसन्निधापयन्तीत्यादि विधेयगुणान्तराभावेनानुवादासंभवात्पुनर्विधानेन भेदहेतुरितिचेधम्यम् चतुर्दशाधि० दर्शपूर्णमासयोः प्रोक्तः आग्ने
यः केवलोप्यसौ दर्शपौर्णिमावाक्याभ्यां कर्मास्मद्वानुवादगीः आग्नेयादि कर्मत्वं दर्शद्वौ हि प्रयुज्यन्तां एकत्वमप्यभिज्ञानादनूद्यते द्वाग्नस्तुतिः २
यदाग्नेयोष्टाकपालोमावास्यायां पूर्णमास्यां चाच्युतो भवतीति कालद्वये विहिते तदाग्नेयो ऽष्टाकपालोमावास्यायां भवतीत्यस्मिन्काले पु
नर्विहितेऽत्रावशेषपुनः श्रुतिलक्षणानाभ्यासेन प्रयाजभ्यामिव भेदः तथा सत्याग्नेययागस्य दर्शकालेऽपि द्विःप्रयोग इति चेन्नैवं प्रत्यभिज्ञानादाग्ने
यस्य कालेऽसत्येककालत्वात्कस्याप्यनुवादकत्वान्न चानुवादोऽनर्थः विधेयद्वाग्नस्तुत्यर्थत्वात् यद्याग्नेयोऽष्टाकपालोमावास्यायां भवतीति तथा

द्वि
न्या॰मा॰
४६

46

पिनकेवलेनाग्निना साध्यं भवतीदं इष्टसहितोऽग्निः समीचीनतरः तस्मादिष्टान्तस्थः कर्तव्य इति विधेयस्तुतिः प्रयाजेष्वेव सम्यक्तत्क्रमेवानुसंधेयम् ॥
इति श्रीमाधवीये जैमिनिन्यायमालाविस्तरे द्वितीयाध्यायस्य तृतीयः पादः ॥ चतुर्थपादस्य प्रथमाधिकरणमारचयति यावज्जीवं जुहोतीति विधेः
कर्मणि पुंसि वा कालत्वात्कर्मधर्मो नं काम्यकः प्रयुक्तेनैककालत्वाज्जीवनेनेत न निमित्तप्रविभागतः काम्यप्रयोगाभिन्नः स्याद्यावज्जीवप्रयोगतः १
वह्वृचब्राह्मणे श्रूयते यावज्जीवमग्निहोत्रं जुहोतीति तत्र यावज्जीवशब्दो मरणावधिकालपरः तत्कालसंबंधश्च प्रकृतेन काम्येऽग्निहोत्रे सर्वमस्मा-
मत्वाज्जुहोतीत्यस्त्वाश्रितकर्मणि विधीयते तत्र यथा मासमप्यवाक्यस्य नित्यप्रयोगविधायकत्वाभावेन याकारा त्वविहितः कम्यप्रयोगाकरणोऽग्नि-
होत्रस्य सर्वं स्मतिसंचकाम्यप्रयोगोऽभ्यसितव्यः सकृदनुष्ठानस्याग्निहोत्रं जुहुयात्स्वर्गकाम इत्यनेनैव सिद्धत्वात् यावज्जीवेत्यस्य कालविधे-
र्वैयर्थ्यप्रसङ्गात्तस्मादयं काम्यकर्मणोऽभ्यासमिद्ध्यै कालरूपधर्मविधिरिति प्राप्ते ब्रूमः यावज्जीवशब्दो न कालस्य वाचकः किन्तु जीवनस्य कः वा
आर्थस्तु कालो जीवनेन च जीवनेन कर्मधर्मत्वेन विधातुं शक्यं तस्य पुरुषधर्मत्वात स[redacted]च पुरुषधर्मं निमित्तीकृत्याग्निहोत्रप्रयो-
गो विधीयते न चात्र कर्मभेदः तद्वाचिनो शब्दान्तरादीनामभावात् न चाभ्यासस्तद्धेतुः निमित्तविशेषसम्बन्धेनाविशेषणेन श्रुतेरभावात् अतः
प्रयोगभेदः पर्यवस्यति जीवनस्य च निमित्तत्वात् निमित्ते नैमित्तिकस्य प्रयोगान्नित्यत्वमर्थसिद्धं न च जीवनं तेरं तेषु काम्यप्रयोगेनैरन्तर्यो-
पत्तिः सायंप्रातः काले योर्विहितत्वात् तस्माज्जीवनस्य पुरुषधर्मत्वान्नित्यकाम्यप्रयोगो भिन्नो द्वितीयाधि॰ शाखाभेदात्कर्मभेदोऽनवात्र राम॰
कर्माभिधेतेदृष्टं काठकनामादिवहुभेदे स्यकारणं ग्रंथद्वारादिनास्येते पुंस्पंते भेदेहतव रूपादिप्रसभिज्ञानादभिन्नं कर्मगम्यते २ काठक ४६

कारीरवमाध्यंदिनतैत्तिरीयादिशाखासु दर्शपूर्णमासाख्यं कर्मैकं तत्तच्छाखाभेदात्कर्म भिद्यते कुतः भेदकारणानां नामभेदादीनां बहुलमुपल
भ्यमानत्वात् काठककारीरकादिको नामभेदः कारीरीवाक्यान्यधीयानाः केचित् भूमौ भोजनमाचरंति शाखान्तराध्यायिनो नाचरंतीति ध
र्मभेदः एकस्यां शाखायामधीता इषे त्वेत्यादयो मंत्राः पलाशशाखाछेदनादयः क्रियाः शाखान्तरेऽप्यधीयन्त इति पुनरुक्तिः एवमन्यत्वादयो भेद
हेतव उदाहार्याः नस्यत्वात्पृथगननुष्ठानेन सर्वशाखाध्ययनपूर्वकं कर्मानुष्ठानं कर्तुं शक्यं तस्माच्छाखाभेदेन कर्मभेद इति प्राप्ते ब्रूमः रूपाद्यभेदा
देकं कर्म आग्नेयाष्टाकपालादिद्रव्यागरूपं पदेवं कस्यां शाखायां तदेवाम्नातोपलभ्यते दर्शपूर्णमासाभ्यां यजेतेति प्रागरूपः पुरुषव्यापारश्चैक
विधः दर्शपूर्णमासाविति कर्मनामाप्येकं स्वर्गकाम इति फलसंबंधोऽप्येकः तस्माद्भिन्नकर्मपरं प्रत्युपसंहर्तव्य स्वन्यथासंगच्छते काठकादिकं ज्यो
तिरादिवन्न कर्मनाम काठकेनाम्प्रोक्ते तत्र प्रवचनात् काठकमधीतमिति प्रयोगात् पृथग्नामेसवगात्त भूभोजनादिरध्ययनधर्मः पुनरुक्तिरध्येत
भेदान्न दुष्यति अस्माप्रयोगापि शाखान्तरस्थोपसंहारन्यायेन कर्मानुष्ठातुं शक्यते तस्मादनन्यथासिद्धरूपमसभिज्ञाना शाखाभेदेऽपि
कर्म न भिद्यते ॥ इति श्रीमाधवीये जैमिनिन्यायमालाविस्तरे द्वितीयाध्यायस्य चतुर्थः पादः १ ॥

१२
वि



क्र
प्रथँद्वितीयौँध्यायौ

म ३ १२६०.

जैमिनिन्यायमालाद्वितीयाध्यायः

39 19